॥ अथ यजुर्वेदि श्राद्धप्रयोग प्रा० ॥

॥ इति यजुर्वेदि श्राद्धप्रयोग स० ॥

श्रीलक्ष्मीनृसिंहप्रसीद ॥ आचम्य ॥ केशव ॥ नारायण० पवित्रंवौहिरंण्यपुना
त्येवेनं बहुवैराज्यन्यो ॥ नृतंकरोति ॥ उपजाम्यहरति ॥जिनातिब्राह्मणंवदत्यनृतं॥
अनृतेखलुवैक्रियमानोवरुणोगृण्हाति ॥ वारुणंयवमयंचरुंनिर्वपति ॥ वरुण
पाशादेवैनंमुंचति ॥ अश्वोदक्षिणा ॥ वारुणोहिदेवतयाअश्वःसमृध्यै ॥ पवित्रवंतः
परिवाजमासतेपितेषांप्रत्नोअभिरक्षातिव्रतं ॥ महःसमुद्रंवरुणास्तिरोदधेधीराइ
छेकुर्धरुणेष्वारभं ॥ पवित्रंधृत्वा ॥ अपक्रामंतुभूतानिपिशाचाः सर्वतोदिशः ॥
सर्वेषामविरोधेन श्राद्धकर्मसमारभे ॥ इतिमंत्रेणशिखांकटीचबध्वा ॥ पुनराच-
म्य ॥ संकल्प्य श्रीगोविंदगोविंद।एवंगुणविशेषणविशिष्ठायांपुण्यातिथौअ०॥पि-
तंतर्यामिश्रीमज्जनार्दनवासुदेवप्रेरणयाजनार्दनवासुदेवप्रीत्यर्थंपितुःप्रतिसांवत्सरी
कश्राद्धकर्मकरिष्यमाणःदेहेंद्रियाद्रौआत्मशुध्यर्थंगृहशुध्यर्थंभांडभाजनशुध्यर्थंका
लातिक्रमदोषपरिहारार्थंप्रायश्चित्तसूक्तजाप्यमहंकरिष्ये । तदंगत्वेनयवोदकति

poornapathi@gmail.com

लोदकंचकरिष्ये ॥ इदंतेपात्रंसनंवित्तमिंद्रपिबासोममेनाशतक्रतो ॥ पूर्णआहा
वोमंदिरस्यमध्वोयंविश्वइदभिहर्यंतिदेवाः इमंमेगंगेयमुनेसरस्वतीशितुद्रिस्तोमꣳस
चतापरुष्णिया ॥ असिक्नियामरुद्वृधेवितस्तयार्जीकियेश्रृणुह्यासुषोमया ॥
इतिउदकमापूर्य ॥ कांडात्काडात्प्ररोहंतिपुरुषःपुरुषःपरि ॥ एवानोदुर्वेप्रतरनुस
हस्रेणशतेनच ॥ दर्भानिक्षिप्य ॥ यवोसिधान्यराजोवावारुणोमधुसंयुतः ॥
निर्णोदःसर्वपापानांपवितृमृषिभिःस्मृतं ॥ इतियवः ॥ तिलोसिसोमदेवत्योगो
सवोदेवनिर्मितः ॥ प्रत्नवद्भिःप्रत्नस्वधयापितॄन्निमान्लोकान्प्रीणयाहिनःस्वधा
नमः ॥ तिलान्निक्षिप्य ॥ गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं ॥ ईश्वरीꣳसर्व
भूतानांतामिहोपह्वयेश्रियं । इतिगंधं । याःफलिनीर्याइतिफलं॥ सहिरत्नानिदाशु
षेसुवातिसविताभगः ॥ तंभागंचित्रमीमहे॥ पुरुषसूक्तपठणं। पवमानसुवर्चनःपवित्रे
णविचर्षणिः॥ यःपोतासपुनातुमां ॥ पुनंतुमांदेवजनाः ॥ पुनंतुमनवोधिया ॥ पुनं

तुविश्वआयवः ॥ जातवेदःपवित्रवत् ॥ पवित्रेणपुनीहिमा ॥ शुक्रेणदेवदीधत् ॥ अग्ने
क्रत्वाक्रतुꣳरनु ॥ यतेपवित्रमर्चिषि ॥ अग्नेविततमंतरा ॥ ब्रह्मतेनपुनीमहे ॥
उभाभ्यांदेवसवितः ॥ पवित्रेणसवेनच ॥ इदंब्रह्मपुनीमहे ॥ वैश्वदेवीपुनतीदे
व्यागात् ॥ यस्यैवबह्वीस्तनवोवीतपृष्ठाः ॥ तयामदंतःसधमाद्येषु॥ वयꣳस्यामप
तयोरयीणां वैश्वानरोरश्मिभिर्मापुनातु॥ वातःप्राणेनेषिरोमयोभूः ॥ द्यावापृथ्वीप
यसापयोभिः ॥ वर्षिष्ठैर्देवमन्माभिः ॥ अग्नेदक्षैःपुनीहिमां ॥ येनदेवाअपुनत् ॥
येनपोव्यंकशः ॥ तेनदिव्येनब्रह्मणा ॥ इदंब्रह्मपुनीमहे ॥ यःपावमानीरध्येति ॥
ऋषिभिःसंभृतꣳरसं ॥ सर्वꣳसपूतमश्नाति ॥ स्वदितंमातारिश्वना ॥ पावमानी
र्योअध्येति ॥ ऋषीभिःसंभृतꣳरसं ॥ तस्मैसरस्वतीदुहे ॥ क्षीरꣳसर्पिर्मधूदकं ॥
पावमानीस्वस्त्ययनीः ॥ सुदुघाहिपयस्वतीः ॥ ऋषिभिःसंभृतोरसः ब्राह्मणेष्व
मृतꣳहितं ॥ पावमानीर्दिशंतुनः ॥ इमंलोकमथोअमुं ॥ कामानसंवर्धयंतुनः॥

देवैर्देवैसमाभृताः ॥ पावमानीस्वस्त्ययनीः ॥ सुदुघाहिघृतश्चुतः ॥ ऋषिभिसंभृ
तोरसः ॥ ब्राह्मणेष्वमृतꣳहितं ॥ येनदेवापवित्रेण ॥ आत्मानंपुनतेसदा ॥
तेनसहस्रधारेण ॥ पावमानीःपुनंतुमां ॥ प्राज्यापत्यंपवित्रं ॥ शतोद्यामꣳ
हिरण्मयं ॥ तेनब्रह्मविदोवयं ॥ पूतंब्रह्मपुनीमहे ॥ इंद्रःसुनीतीसहमापुनातु ॥
सोमःस्वस्त्यावरुणःसमीच्या ॥यमोराजाप्रमृणाभिपुनातुमा ॥ जातवेदामूर्जयंत्या-
पुनातु ॥ कुश्मांडैर्जुहुयाद्योपूतइवमन्येत ॥ यथास्तेनोयथाभ्रूणहैवमेशभवति॥यो-
योनौरेतःसिंचति ॥ यदर्वाचीनमेनोभ्रूणहत्यायास्तस्मान्मुच्यते। । यावदेनोदीक्षा
मुपैति ॥ दीक्षितएतैसंततिर्जुहोमि ॥ संवत्सरंदीक्षितोभवति ॥ संवत्सरादेवात्मानं-
पुनीते ॥ मासंदीक्षितोभवति ॥ योमासःससंवत्सरः ॥ संवत्सरादेवात्मानं-
पुनीते ॥ चतुर्विंशतिरात्रीर्दीक्षितोभवति ॥ चतुर्विंशत्यर्धमासाःसंवत्सरादेवात्मानं-
पुनीते ॥ द्वादशरात्रीर्दीक्षितोभवति ॥ द्वादशमासाःसंवत्सरादेवात्मानंपुनीते ॥

षड्रात्रिर्दीक्षितोभवति ॥ षड्वाऋतवः ॥ संवत्सरादेवात्मानंपुनीते ॥ तिस्रोरा-
त्रीर्दीक्षितोभवति ॥ त्रिपदागायत्री ॥ गायत्र्यादेवात्मानंपुनीते ॥ नमाꣳसमा-
स्नीयान् नस्त्रीयमुपेयानोपर्यासीत् ॥ जिगुप्सेतानृतात्वयोब्राह्मणस्यव्रतंयुवाꣳ
राजन्यस्याभिक्षावैश्यस्याथो सौम्येप्यध्वरःएतद्व्रतंब्रूयाद्यदिमन्यतोपदस्यामीत्यो
धनंधानाःसक्तून् ॥ घृतमित्यनुव्रतदेयमात्मानोनुपसादाय ॥ शारीरवंतःकरुणो
पघातर्वाचश्चविष्णुर्भगवानशेषः ॥ शमन्वयत्वस्तममेहशर्मपापादनंतोत्त्हदिसं
निविष्टः। अंतःशुद्धिर्बहिश्शुद्धिशुद्धोधर्ममयोच्युतः॥ सकरोत्वमरेतस्यशुचिरेवास्मि
सर्वदा ॥ बाह्योपघातानन्वोबोद्धाचभगवानजः । शारीरंमेहृषीकेशपुंडरीकाक्षमा
नसे। पापंप्रशमयाद्यत्वंवाकृतंममसाधव ॥ यद्यप्युपहतःपापैः यदिवात्यंतदुष्कृतैः ॥
तथापिसंस्मरेद्विष्णुंसर्वपापैःप्रमुच्यते ॥ शुचीवोहव्यामरुतःशुचीनाꣳ शुचि
ꣳहिनोम्यध्वरꣳ शुचिभ्यः ॥ ऋतेनसत्यमृतसापआयंश्शुचिजन्मानःशुचयःपाव-

poornapathi@gmail.com

काः ॥ अग्निःशुचिव्रततमःशुचिर्विप्रःशुचिःकविःशुचीरोचतआहुतः ॥ उदग्ने शुचयस्तवशुक्राभ्राजंतईरते ॥ तवज्योती ँ ष्यर्चयः ॥ अपवित्रःपवित्रोवास र्वावस्थांगतोपिवा यःस्मरेत्पुंडरीकाक्षंसबाह्याभ्यंतरःशुचिःसर्वाणिस्थ०शु०भ० ॥ नारायणायपरिपूर्णगुणार्णवाय०॥ मातर्मेमातरिश्वन्०। अपसव्यपितृंतर्यामिणः॥ सव्येविश्वेदेवांतर्यामिणः । अनिरुद्धप्रद्युम्नसंकर्षणवासुदेवचतुर्मूर्तिंश्राद्धस्वामी श्रीमध्ववल्लभजनार्दनसमाराधनंकरिष्ये ॥ कुरुष्व ॥ ब्रह्मदंडार्थेसकुशतिलहि-रण्यंगृहीत्वा ॥ समस्तसंपत्समवाप्तिहेतवः समुत्थितापत्कुलधूमकेतवः ॥ अपा-रसंसारसमुद्रसेतवः पुनंतुमांब्राह्मणपांदपांसवः ॥ आपद्घनध्वांतसहस्रभानवः समीहितार्थार्पणकामधेनवः ॥ समस्ततीर्थांबुपवित्रमूर्तयो रक्षंतुमांब्राह्मणपादपां-सवः ॥ विप्रौघदर्शनात्क्षिप्रं क्षीयंतेपापराशयः ॥ वंदनान्मंगलावाप्ति रर्चनादच्यु-तंपदं ॥ आधिव्याधिहरन्नृणां मृत्युदारिद्रनाशनं ॥ श्रीपुष्टिःकीर्तितंवंदे विप्रश्री

पादपंकजं ॥ नमोब्रह्मण्यदेवाय गोब्राह्मणहितायच ॥ जगद्धितायकृष्णाय गोविं-दायनमोनमः ॥ यावतीर्वैदेवतास्ता सर्वावेदविदिब्राह्मणेवसंति ॥ तस्माद्ब्राह्म-णेभ्यो ॥ वेदविद्भ्योदिवेदिवेनमस्कुर्यान्नाश्लीलंकीर्तयेदेवताएवदेवताःप्रीणाति ॥ अपसव्य० ॥ भागधेयेनैवैनंप्रणयति ॥ ब्राह्मणआर्षेयउद्धरेत् ॥ ब्राह्मणोवैसर्वा-देवताः ॥ सर्वाभिरेवैनंदेवताभिरुद्धाति ॥ पितृभ्योनमः ॥ सव्य ॥ अक्रोधनै-शौचपरैःसततंब्रह्मचारिभिः ॥ भवितव्यंभवद्भिश्चमयाचश्राद्धकर्मणि ॥ पितुः प्रतिसांवत्सरीकश्राद्धकर्तुंममअधिकारसंपदस्त्वितिभवंतोब्रुवंतु ॥ कालस्यमुख्य-कालोस्तु ॥ पाकादीनांहवियोग्यतास्त्वितिभवंतोब्रुवंतु ॥ पाकादीनांहवियों-ग्यतास्तु ॥ सव्येनप्राणायामः ॥ पूर्वोच्चरितएवंगुणविशेषणविशिष्ठायांपुण्यतिथौ । अपसव्यपितुःप्रतिसांवत्सरीकश्राद्धेपितृपितामहप्रपितामहानांशर्मणांगोत्राणांत-दंतर्यामिवसुरुद्रादित्यरूपाणां ॥ प्रद्युम्नसंकर्षणवासुदेवानां पुरूरवार्द्रवसंज्ञिका-

नां ॥ विश्वेषांदेवानां ॥ पितुःप्रतिसांवत्सरीकश्राद्धेअन्नादिद्रव्येणहविषापार्वण-
विधानेनसदैवंसाग्नौकरणंसपार्वणंसद्यःकरिष्ये ॥ कुरुष्व । इतिदर्भग्रंथिःकटिप्रदे-
शेक्षेपणीया । सव्य० ॥ पुरूरवार्द्रवसंज्ञिकाःविश्वेदेवाःस्थानेआहवनीयार्थेक्षणं-
दत्तं ॥ भवद्भिःक्षणःप्रसादःकर्तव्यःसुकर्तव्यः ॥ अपसव्यअस्मत्पितृपितामहप्र-
पितामहानां शर्मणांगोत्राणां तदंतर्यामिवसुरुद्रादित्यरूपाणां ॥ प्रद्युम्नसंकर्षण-
वासुदेवानांस्थानेभवद्भिक्षणःप्रसादःकर्तव्यःसुकर्तव्यः ॥ देवानांचपितृणांच
स्वागतंसुस्वागतं ॥ अक्रोधनैशौचपरैःसततंब्रह्मचारिभिः भवितव्यं भवद्भिश्चम-
याचश्राद्धकर्माणि ॥ तदंगत्वेनब्राह्मणपादप्रक्षालनंचकरिष्ये ॥ उत्तरेमंडलंदैवंद-
क्षिणेपैतृकंतथा ॥ मंडलंतुप्रकुर्वीतद्वयोर्मध्येषडंगुलं ॥ सव्येन ॥ देवपाद्यस्थाने-
इमेदर्भाःइमेयवाःअष्टार्घ्याःसंपूर्णार्चनमस्तु ॥ अपसव्येनपितृपाद्यस्थाने इमेतिलाः
इमेदर्भाःअष्टार्घ्याःसंपूर्णार्चनमस्तु ॥ सव्येनपादप्र० ॥ आगतंसुस्वागतंइदंतेपाद्यं-

सुपाद्यं ॥ शुक्रमसिज्योतिरसितेजोसिदेवोवः सवितात्पुनात्वछिद्रेणपवित्रेणवसोः
सूर्यस्यरश्मिभिः ॥ शन्नोदेवीरभिष्टये आपोभवंतुपीतयेशंयोरभिस्रवंतुनः ॥
यदिछसिमहाराजासर्वतीर्थावगाहनं ॥ विप्रपादविनिर्मुक्तं तोयंशिरसिधारयेत् ॥
मंत्रमध्येक्रियामध्येविष्णोःस्मरणपूर्वकं ॥ यत्किंचितक्रियतेकर्मतत्कर्मसफलंकुरु ॥
पृथिव्यांयानितीर्थानियानितीर्थानिसागरे ॥ सागरेसर्वतीर्थानिपदेविप्रस्यदक्षिणे ॥
अपसव्य ॥ पितृपितामहप्रपितामहाः गोत्राःशर्मणःवसुरुद्रादित्यरूपाः तदंतर्या-
मिप्रद्युम्नसंकर्षणवासुदेवाःस्वागतंसुस्वागतं पितृपितामहप्रपितामहानांगोत्राणां-
शर्मणांस्वागतं इदंतेपाद्यं सुपाद्यं ॥ शुक्रमसिज्योतिरसि तेजोसिदेवोवः सवितात्पु-
नात्वछिद्रेणवसोःसूर्यस्यरश्मिभिः ॥ शन्नोदेवीरभिष्टये० ॥ यदिछसिमहाराजा
सर्वतीर्थावगाहनं ॥ विप्रपादविनिर्मुक्तंतोयंशिरसिधारयेत् ॥ कर्तापादौप्रक्षाल्य ॥
पवित्रंग्रंथिविसृज्य ॥ आचम्य ॥ पवित्रंधृत्वा ॥ पवित्रवंतोन्येहागृह्यंतोकिंपवि-

poornapathi@gmail.com

त्रउपाᳪशुरितिवाक्पवित्रइतिब्रूयाद्वाचस्पतयेसोमपीथइत्याहवावरुध्यै ॥ पवि-
त्रवंतः परिवाजमासतेपितेषांप्रत्नोअभिरक्षतिव्रतंमहः समुद्रंवरुणस्तिरोदधेधीराइ-
च्छेकुर्धरुणेष्वारभं॥सव्य०॥पुरूरवार्द्रवसंज्ञिकाविश्वेदेवाःभूर्भुवःसुवःअयंवोविष्टरः
अत्रउपविशंतुभवंतः ॥ उपविशामः ॥ अपसव्य ॥ पितृपितामहप्रपितामहाः
भूर्भुवस्स्वभास्ता ॥ अयंवोविष्टरः अत्रउपविशंतु भवंतःउपविशामः ॥ सव्य ॥
अद्यपूर्वोच्चरितएवंगुणविशेषणविशिष्टायांपुण्यतीथौ ॥ प्रक्रांतं ॥ भवदनुज्ञया-
प्रातिसांवत्सरीकश्रात्धकर्मकारिष्ये ॥ कुरुष्व ॥ अपाहताःअसुराःरक्षांसिपिशाचाःयेक्ष-
यंतिपृथ्वीमनु ॥ अन्यत्रेतोगछंतियत्रैतेषांगतंमनः ॥ उदीरतामवरउत्परासउ-
न्मध्यमाःपितरःसोम्यासः ॥ असुंयईयुऋतज्ञास्तेनोभवंतुपितरोहवेषु ॥ ॐभूर्भु-
वसुवः ॥ स० ॥ श्रात्धकालेगयांध्यात्वाध्यात्वादेवंजनार्दनं ॥ वस्वादींश्चपितृ-
न्ध्यात्वाततःश्रात्धंप्रवर्तये ॥ प्रवर्तय ॥ संपादितेषुपदार्थेषुश्रात्धेहविर्योग्यता

स्त्वितिभवंतोब्रुवंतु ॥ श्रात्धेहविर्योग्यतास्तु ॥ पुरूरवार्द्रवसंज्ञिकानां विश्वेषां-
देवानां इदमासनं ॥ सुखासनं ॥ आस्यतांधर्मोसिआपः ॥ विश्वेदेवैःक्षणः
क्रियतां ॥ ॐ तथा ॥ प्राप्नोद्भवान् ॥ प्राप्नुवानिति ॥ अर्घ्यमासाद्य ॥ मंड-
लंकृत्वा ॥ मंडलोपरियवदर्भान्निधाय ॥ पात्रद्वयंनिधाय ॥ उपरिदर्भानास्तीर्य ॥
गायत्र्याप्रोक्ष्य ॥ उधृत्य ॥ उत्तानेप्रोक्ष्य ॥ उधृत्य ॥ यवान्विकीर्य ॥ उदकमा
सिच्य ॥ शन्नोदेवीरभिष्टये आपोभवंतुपीतये ॥ शंयोरभिस्रवंतुनः ॥ यवो
सिधान्यराजोवावारुणोमधुसंयुतः ॥ निर्णोदःसर्वपापानां पवित्रमृषिभिः
स्मृतं ॥ अर्घ्यपात्रयोः अयंगंधः ॥ इमेयवाः ॥ इमेदर्भाः इयंश्रीतुलसीपत्र
कुशाग्राणि ॥ देवपात्रेसंपन्ने सुसंपन्ने ॥स्वाहार्घ्यौ॥ संत्वर्घ्यौ ॥ पुरूरवार्द्रवसंज्ञिकान्
विश्वान्देवान् तदंतर्यामिअनिरुत्धसंकर्षणवासुदेवान् ॥ भवत्सुआवाहयिष्ये ।
आवाहय ॥ विश्वेदेवासआगतश्रृणुतामयिᳪहवं यइदंबर्हिर्निषीदथ ॥ विश्वेदेवा-
श्रृणुतेमᳪहवंमेयेअंतरिक्षेयउपद्याविष्टाये ॥ अग्निर्जिव्हाउतवाजत्रा ॥ आसद्या-

स्मिन्बर्हिषिमादयध्वं ॥ ततःशुद्धोदकं ॥ पुरूरवार्द्रवसंज्ञिकाः विश्वेदेवोः
तदंतर्यामिश्रीअनिरुद्धनारायणइदंवोअर्घ्यंस्वाहा ॥ अस्त्वर्घ्यं ॥ ततःशुद्धोदकं ॥
या दिव्यापः पयसासंबभूवुर्याअंतरिक्षेउतपार्थिवीर्याःहिरण्यवर्णायज्ञियानस्था-
आपशं शोनाभवंतु ॥ विश्वेभ्योदेवेभ्यः पात्रयोःस्थानमसीत्युत्तानंदक्षिणतो
निधाय ॥ अर्चितप्रार्चितप्रियमेधासोर्चितअर्चंतुपुत्रकाः उतपूरन्नधृष्ण्यवर्चित
पुरूरवार्द्रवसंज्ञिकाः ॥ यथाभागशःअमीवोगंधाः सुगंधाःसुप्रसादः माल्यार्थेअयं
श्रीतुलसीप्रसादः ॥ उदकेनैवसंकल्पितंवोधूपः ॥ सुधूपः ॥ सूर्यस्तंभइवज्योतिः
सुज्योतिः ॥ युवासुवासाःपरिवीतआगात्सउश्रेयान्भवतिजायमानः ॥ तंधीरासः
कवयोउन्नयंतिस्वाध्यो३मनसादेवयंतः ॥ इतिवस्त्रंआच्छादनार्थेमनसोद्दिष्टं
यत्किंचिद्धिरण्यंसकुशं ॥ स्वाहानमम ॥ अनुलेपनार्थेगोपीचंदनं ॥ धारणार्थेय-
ज्ञोपवितं ॥ अच्छादनार्थेइमौकुशौ ॥ संतुकुशौ ॥ युष्मदनुज्ञयापितृंतर्यामिश्री-
मज्जनार्दनवासुदेवस्यार्चनंकरिष्ये ॥ कुरुष्व ॥ अपसव्य ॥ पितृपितामहप्रपि-

तामहानांगोत्राणांशर्मणां ॥ इदमिदमासनं ॥ सुखासनं आस्यतांधर्मोसिआपः ॥
पितुःप्रतिसांवत्सरीकश्राद्धेक्षणःक्रियतां ॥ ॐतथाप्राप्नोद्भवान् ॥ प्राप्नुवानीति ।
अर्घ्यमासाद्य ॥ मंडलंकृत्वामंडलोपरितिलदर्भान्निधायपात्रत्रयंनिधाय ॥
सव्येन । गायत्र्याप्रोक्ष्य ॥ अपस० ॥ उपरीदर्भानास्तीर्य ॥ तिलान्विकीर्य ।
शन्नोदेवीतिमंत्रेणउदकंपूरयित्वा ॥ तिलोसिसोमदे० ॥ इतिमंत्रेण तिलान्नि-
क्षिप्य ॥ अर्घ्यपात्रेषु अयंगंधः इमानिश्रीतुलसीदर्भपत्रकुशाग्राणि ॥ पितृपात्रा-
णिजुष्टंगृण्हामि प्रपिता महपात्राणि जुष्टं गृण्हामिस्वधार्घ्याःसंत्वर्घ्याः पितृपा-
त्राणिसंपन्नानि ॥ पितामहपात्राणिसंपन्नानि ।प्रपितामहपात्राणिसुसंपन्नानि ॥
पितृपितामहप्रपितामहान् गोत्रान् ॥ शर्मणः वसुरुद्रादित्यरूपान् भवत्सुआ-
वाहयिष्ये ॥ आवाहय । उशं तस्त्वानिधीमह्युशंतःसमिधीमहि ॥ उशन्नुशत-
आवह पितृन्हविषेअत्तवे ॥ आयंतुनःपितरःसोम्यासो अग्निष्वात्तापथिभिर्देव-
यानैः ॥ अस्मिन्यज्ञेस्वधयामदंतु ब्रुवंतुते ॥ अवंत्वस्मान् सावधानाभवंतुते ॥

poornapathi@gmail.com

शुद्धोदकं ॥ यादिव्यापः इतिमंत्रेण ॥ हस्तेअर्घ्यंदत्वा ॥ पितृपितामहप्रपि-
तामहपात्रेभ्यः स्थानमसि ॥ ताभिरद्भिःपुत्रकामोमुखमनक्ति ॥ पुत्रवान्भव ॥
अर्चितप्रार्चितेतितिलैः शिरप्रभृतिपादांतमभ्यर्च्य ॥ पितृपितामहप्रपिताम-
हेभ्यः यथाभागशः अमीवोगंधः प्रसादः ॥ सुगंधाःसुप्रसादः ॥ आयनेतेति
पुष्पं ॥ माल्यार्थेइमानि श्रीतुलसी कुशाग्राणि । उदकेनैवसांकालिपतंवोधूपः
सुधूपः ॥ सूर्यस्तंभइवज्योतिःसुज्योतिःयुवासवासाइतिवस्त्रं ॥ अनुलेपनार्थे-
गोपीचंदनं ॥ धारणार्थेयज्ञोपवीतं ॥ फलार्थेपूगीफलं ॥ आच्छादनार्थेयन्मन-
सोद्दिष्टं किंचित्धिरण्यं ॥ पवित्रार्थेइमेकुशाःसंतुकुशाःयुष्मदनुज्ञयापितृंतर्यामि
श्रीमज्जनार्दनवासुदेवस्य मंडलाद्यर्चनंकरिष्ये ॥ कुरुष्व ॥ अप० । पिशंगभृ-
ष्टिमंभ्रणंपिशाचमिंद्रसंभृणा सर्वंरक्षोनिबर्हय ॥ पितुःभोजनपात्रेनवांकितं ॥
सव्य ॥ बृहत्सामक्षत्रभृद्वृत्धवृष्णियंत्रिष्टभोजः क्षुभितमुग्रवीरं ॥ इंद्रस्तोमेनपंच-
दशेनमध्यमिदं वातेनसगरेणरक्षा देवपात्रेसप्तांकितं ॥ शुद्धोदकं ॥ एवंगुण

विशेषणविशिष्ठायांपुण्यतिथौ ॥ पितृंतर्यामिश्रीमज्जनार्दनवासुदेवप्रेरणया
जनार्दनवासुदेवप्रीत्यर्थंप्रतिसांवत्सरिकश्रात्धीयभवदनुज्ञया औपासनाग्नौकरणं
करिष्ये ॥ घृतोक्तमन्नमादाय ॥ पूर्वोच्च० । विच्छिन्नौपासनाग्नेः पुनःसंधानंक-
रिष्ये ॥ यत्राग्निःस्थाप्यते तत्रप्राचीरुदक्संस्थाः तिस्र स्तिस्रोरेखालिखित्वा ॥
अद्भिःप्रोक्ष्य ॥ शेषंनिधाय ॥ भूर्भुवःसुवरों ॥ अग्निंप्रतिष्ठाप्य ॥ शेषमुत्सृज्य ॥
चत्वारिश्रृंगात्रयोअस्यपादा ॥ द्वेशीर्षेसप्तहस्तासोअस्य ॥ त्रिधाबद्धो
वृषभोरोरवीतिमहोदेवोमर्त्यां ५ आविवेश ॥ एषहिदेवः प्रदिशोनुसर्वाःपुर्वोहि-
जातःसउगर्भेअंतः ॥ सविजायमानसजनिष्यमाणप्रत्यङ्मुखास्तिष्ठतुविश्वतो-
मुखः ॥ प्राङ्मुखोभव ॥ ममसन्मुखोभव ॥ परिसमोहनं ॥ पर्युक्षणं ॥
परिस्तरणं ॥ अग्नयेन० ॥ हुतवाहनाय० ॥ हुताशनाय० ॥ कृष्ण-
वर्त्मनेन० ॥ देवमुखाय० ॥ सप्तजिंव्हायन० ॥ वैश्वानराय० ॥
जातवेदसेन० ॥ यज्ञेश्वराय० ॥ अदितेनुमन्यस्व ॥ अनुमतेनुमन्यस्व ॥ सर-

स्वतेनुमन्यस्व ॥ देवसवितुः प्रसुव ॥ भूर्भुवःसुवःप्रजापतयइदंनमम ॥ अया-
श्चाग्नेश्चनभशस्तीश्चसत्यमित्वमयाअसि ॥ अयासावयसाधृतोयासन्हव्यमूहं
षेयानोधेहिभेषजं ॅस्वाहाअग्नयइदंनमम ॥ अदितेनुम ॅस्थाः ॥ अनुमतेनुम-
ॅस्थाः ॥ देवसवितःप्रासावीः ॥ अग्नेत्वन्नोअंतमः ॥ उतत्राताशिवोभवावरूथ्यः
॥ तंत्वाशोचिष्ठदीदिवः सुन्मायनूनमीमहेसखिभ्यः ॥ वसुरग्निर्वसुश्रवः ॥
अछानक्षिद्युमत्तमोरयिंदाः सनोबोधिश्रुधिहवमनुष्याणोअघायतसमस्मात् ॥
स्वस्तिश्रद्धांमेधांयशः प्रज्ञांविद्यांबुद्धिंश्रियंबलंआयुष्यंतेजआरोग्यंदेहिमेहव्य-
वाहन ॥ यस्मस्मृत्या० ॥ अनेनसद्यःसंधानेनभगवान् यज्ञपुरुषांतर्यामि
श्रीपरशुरामः प्रीयतांप्रीतोभवतु ॥ श्रीकृष्णार्पणम० ॥ अपसव्य ॥ तूष्णींपरि-
षिच्य ॥ पूर्वपश्चिमदर्भौदक्षिणाग्नौकृत्वा ॥ हविश्चतुर्भागंअपसव्येनकृत्वा ॥
गृहीत्वा ॥सव्येनावशेषयित्वा ॥ जुहुयात् ॥ सव्यंजान्वाच्य ॥ मेक्षणमुपस्ती-
र्य ॥ तेनावदायं ॥ सोमायपितृपतयेस्वधांन० ॥ सोमायपितृपतयइदंन० ॥

पुनरुपस्तीर्य॥ यमायांगिरसस्पतेपितृमतेस्वधांनमम॥ यमायांगिरसस्पतेतापितृम
तइदंन० ॥ आहुतिद्वयशेषंअनुपस्तरणेनादाय ॥ अग्नयेकव्यवाहनायस्वधांन० ॥
अग्नयेकव्यवाहनायइदं० ॥ तुष्णीमेक्षणमग्नावादधाति ॥ नयमायजुहोतीत्येके ॥
येकेषांनयमायेतियाजुपणांमतंस्मृतं ॥ तद्वयसूत्रकृन्मतं ॥ प्राचीनावीति ॥
हुतशेषंपितृपात्रेनिक्षिप्य ॥ किंचित्पिंडार्थेनिदध्यात् ॥ अग्नौकरणंचतुर्भागं
प्रथमंतुहुताशने ॥ द्वितीयंतु द्विजेचैव तृतीयंविकिरमेवच ॥ चतुर्थंपिंडदानंतु
अग्नौकरणं यथाविधि ॥ अन्नपरिवेषणकाले अन्नसूक्तमंत्रपठनंकरिष्ये ॥ मूर्धा-
नंदिवोअरतिं पृथिव्या वैश्वानर मृताजातमाग्निं ॥ कविंॅसंम्राजमतिर्थिंजनाना-
मासंनापात्रंजनयंतदेवाः ॥ सहवैदेवानांचासुराणांच यज्ञौप्रततावास्तां ॥
वयंॅस्वर्गंलोकमेष्यामोवयमेष्यामइतिसुराः संनह्यसहसैवाचरन्ब्रह्मचर्येण तपसैव
देवास्तेसुरामह्यॅस्तेन प्राजानॅपरा भवन्तेन सुवर्गं लोकमायन्प्रसृतेन वैय-
ज्ञेनदेवाः सुवर्गंलोकमायन्नप्रसृतेनासुरान्पराभावयन् प्रसृतोहवै यज्ञोपवीतिनो

poornapathi@gmail.com

यज्ञोप्रसृतोनुपवीतिनः यत्किंचित् ब्राह्मणो यज्ञोपवीत्यधीयते यजतएषतत्तस्मा-
द्यज्ञोपवीत्येवाधीयेत ॥ याजयेद्यजेतवा यज्ञस्य प्रसृत्योअजिनं वासोवादक्षिण-
तउपवीयदक्षिणंबाहु मुत्धरतेवधत्ते सव्यमिति यज्ञोपवीतमेतदेवविपरीतं
प्राचीनावीत ँसंवीतं मानुषंरक्षाँसिहवापुरोनुवाके ॥ तपोग्रमतिष्ठंत तान्प्रजा-
पतिर्वरेणोपामंत्रयत ॥ तानिवरमवृणीता दित्योनु योत्धा इतितान् प्रजापति-
रब्रवीद्योधयध्वमिति तस्माद्धुत्तिष्ठंत ँहवातानिरक्षाँस्यादित्यं योधयंतियावदस्त-
मन्वगातानिहवाएतानिरक्षाँसि गायत्र्याअभिमंत्रितेनांभसाशाम्यंतितद्धहवा
एतेब्रह्मवादिनः पूर्वाभिमुखाः संध्यायांगायत्र्याभिमंत्रिताःआपः ऊर्ध्वंप्रक्षिपंति
ताएताः आपोवज्रीभूत्वा तानिरक्षाँसि मंदेहारुणेद्वीपेप्राक्षिपंति यत्प्रदक्षिणं
प्रक्रमंति तेनपाप्मान मवधून्वंतिउद्यंतमसंयंतमादित्यमभिध्यायन् कुर्वन् ब्राह्मणो-
विद्वान् सकलंभद्रमश्नुतेऽसावादित्योब्रह्मेति ब्रह्मैवसंब्रह्माप्येति ॥ एयवंवेद ॥
किंँस्विदासीत्पूर्वचित्तिः किंँस्विदासिद्बृहद्वयः किंँदाशीत्पिशंगिलाकिंँसिदा-

सीत्पिलप्पिला द्योरासीत्पूर्वचित्तिरश्वआसीद्बृहद्वयः रात्रिरासीत्पिशंगिला आवि-
रासीत्पिलिप्पिला कश्विदेकाकीचरति कउस्विज्जायतेपुनः किंँस्वित्धिमस्यभे-
षजं ॥ किंँसिदावपनं महत् ॥ सूर्यएकाकीचरति ॥ चंद्रमाजायतेपुनः ॥
अग्निर्हिमस्यभेषजं ॥ भूमिरावपनंमहत्पृछामित्वापरमंतं पृथिव्याःपृछामित्वा
भुवनस्यनाभिं ॥ पृछामित्वा विष्णोरश्वस्यरेतो पृछामिवाचः परमंव्योमवेदि
माहुःपरमंतं पृथिव्यायज्ञमाहुर्भुवनस्यनाभिं ॥ सोममाहुर्बृहाद्विष्णोरश्वस्यरेतो
ब्रह्मैववाचः परमेव्योमन् ॥ तेजसावाएष ब्रह्मवर्चसेनवृध्यते ॥ योश्वमेधेनयजते ॥
होताचब्रह्मचब्रह्मोद्यंवदतः ॥ तेजसाचैवेनं ब्रह्मवर्चसेनचसमर्द्धचेतः ॥ दक्षि-
णतो ब्रह्माभवति ॥ देवताभ्यः पितृभ्यश्चमहायोगिभ्यएवच ॥ नमःस्वधायै
स्वहायैनित्यमेवनमोनमः ॥ सप्तव्याधादशारण्येमृगाः कालांजनेगिरौ ॥
चक्रवाकाः शरद्वीपे हंसाः सरासिमानसे ॥ एस्मिजाताः कुरुक्षत्रेब्राह्मणा वेदपा-
रगाः ॥ प्रास्थितादीर्घमध्वान्नंयूयंतेभ्योवसीदथ अमूर्तानांचमूर्तानांपितॄणांदीप्त-

तेजसां ॥ नमस्यामिसदातेषांध्यनीनांयोगचक्षुषां ॥ चतुर्भिश्चचतुर्भिश्चद्वाभ्यांपं-
चभिरेवच ॥ हूयतेचपुनर्द्वाभ्यांसमेविष्णुःप्रसीदतु ॥ सव्येन ॥ गायत्र्यापात्राणि-
प्रोक्ष्य ॥ देवसवितुः प्रसव ॥ सत्यंत्वर्तेनपरिषिंचामि ॥ पृथिवीतेपात्रंद्यौरभिधानं
ब्राह्मणस्त्वामुखेअमृतं जुहोमि ॥ ब्राह्मणानांत्वा प्राणापानयोर्जुहोमि ॥ अक्षत-
रिसिमामे श्रेष्टाअमुत्रामुष्मिन् लोकेइदं विष्णुर्विचक्रमे त्रेधानिदधेपदं ॥ समूळ-
हमस्यपांसुरेस्वाहा ॥ श्रीविष्णोहव्यंरक्षस्व ॥ एतत्धव्यंसपरिकरं दत्तंदास्य-
मानंचद्वयं देवताइयंभूमिः अयंभोक्तागदाधरो भूत्वासुवर्णमयपात्रस्थितमन्नं-
अक्षय्यवटछायेयं पुरूरवार्द्रवसंज्ञिकेभ्यो विश्वेभ्योदेवेभ्यः इदमिदमन्नं अमृतस्व-
रूपं परिमिष्ठं परिवेश्यमानंच आतृप्तेः दत्तंदास्यमानमन्नं स्वाहाहव्यंनमम ॥
गयायां श्रीविष्णुपादादिसमस्तपादेषुदत्तमस्तु ॥ येदेवासोदिव्येकादशस्थ
पृथिव्यामध्येकाशस्ताप्सुददोमहिनैकादशस्थतेदेवायज्ञमिमंजुषध्वं ॥ आगछंतु-
महाभागाः विश्वेदेवाः महाबलाः ॥ येअत्रविहिताश्राध्दे सावधानाभवंतुते ॥

विश्वेदेवांतर्यामिणः अनिरुध्दप्रद्युम्नसंकर्षणवासुदेवाः तुष्टावरदाभवंतु ॥ प्राचीना
वीति ॥ अपसव्य ॥ सत्यंत्वर्तेनपरिषिंचामि ॥ देवसवितुः प्रसव ॥ पृथिवीते-
पात्रंद्यौरभिधानं ब्राह्मणस्त्वामुखे अमृतेअमृतंजुहोमि ॥ ब्राह्मणानांत्वास्वधावि-
द्यावतां प्राणापानयोर्जुहोमि ॥ अक्षतरिसिमामेश्रेष्टामुत्रामुष्मिन्लोके ॥ इदं-
विष्णुर्विचक्रमे ॥ विष्णोकव्यंरक्षस्व ॥ एतत्धव्यं सपरिकरं रजतमयपात्रेस्थित-
मन्नं अक्षय्यवटछायेयं पितृपितामहप्रपितामहेभ्यः गोत्रेभ्यः शर्मभ्यः इदमिद-
मन्नंअमृतस्वरूपं आतृप्तेः दत्तंदास्यमानमन्नंचस्वाहा कव्यंनमम ॥ गयायांश्री-
विष्णुपादादिसमस्तपादेषुदत्तमस्तु ॥ येचेहपितरोयेचनेहयांश्चविद्मयांउचन-
प्रविद्म ॥ त्वंवेत्थयदितेजातवेदस्वधाभीर्यज्ञंसुकृतंजुषस्व ॥ सव्य ॥ ब्रह्मार्पणं-
ब्रह्महविर्ब्रह्माग्नौब्रह्मणाहुतं ॥ ब्रह्मैवतेनगंतव्यं ब्रह्मकर्मसमाधिना ॥ येषामंतर्या-
मिणः उद्दिष्ठा तेषामक्षय्यातृप्तिरस्त्वितिभवंतोब्रुवंतु ॥ तेषामक्षय्या तृप्तिरस्तु ॥
देशकालपातृकर्तृभोत्क्रद्रव्यैः न्युनातिरिक्तास्त्विति भवंतोब्रुवंतु ॥ न्यूनातिरिक्ता-

poornapathi@gmail.com

न्निछिद्रमस्तु ॥ अपसव्य ॥ ॐ ॐ एवंगुणविशेषणविशिष्ठायापुण्यतिथौ ॥ वर्त्तमानेव्यवहारिके ॥ स्वगृहेशालिग्रामचक्रांकितविष्णुवैष्णवसन्निधौ ॥ तानुद्दिश्यमयाक्रियमाणेन पितुःप्रतिसांवत्सरीकश्रात्धेन ।पितृपितामहप्रपितामहप्रपितामहानांगोत्राणांशर्मणां एतेषां सगणो भूत्वागयायां प्रतिसांवत्सरीक श्रात्धेनैवअक्षय्यातृप्तिरस्त्विवतिभवंतोब्रुवंतु ॥ प्रतिसांवत्सरीक श्रात्धेनैव अक्षया तृप्तिरस्तु ॥ सव्य ॥ एकोविष्णुर्महद्भूतं पृथकभूतान्यनेकशः त्रिन्लोकान् व्याप्यभूतात्माभुङ्क्तेविश्वभुगव्यः अनेन पितृयज्ञेन भगवान् पितृंतर्यामिणः विश्वेदेवांतर्यामिणः अनिरुधप्रद्युम्नसंकर्षणवासुदेवात्माचतुर्मूर्तिश्रात्धस्वामिन श्रीमध्ववल्लभ श्रीमज्जनार्द्दनवासुदेवः प्रीयतांप्रीतोभवतु ॥ श्रीकृष्णार्पणमस्तु। मधुवाता ॥ ऋतायतेमधुक्षरंतिसिंधवः ॥ माध्वीर्नः० ॥ इदंमधुइदंमधु० ॥ ॐ तद्ब्रह्मा ॥ ॐतद्वायुः ॥ ॐतदात्मा ॥ ॐतत्सर्वं ॥ ॐतत्पुनर्नवः ॥ अंतश्चरतिभूतेषुगुहायां विश्वमूर्तिषु । त्वंब्रह्मात्वंविष्णुस्त्वंप्रजापतिस्त्वं तुरापोज्योतिरसोअमृतंब्रह्मभूर्भुवस्वरों ॥ ईशान्यविष्णुकमलासनकार्तिकेयवन्हित्रयार्करजनीशगणेश्वराणां ॥ क्रौंचामरेंद्रकलशोद्भवशंभुशक्रपादान्नमामिसततंपितृमुक्तिहेतुं ॥ १ ॥ विष्णोश्चधातृशिवशक्रगुहेंद्र सूर्यवन्हित्रयंच मुखक्रौंचघटोद्भवानां ॥ यत्काश्यपस्यहृदयस्थगदाधरस्यपादान्नमामिसततंपितृमुक्तिहेतुं ॥ २ ॥ पंचक्रोशंगयाक्षेत्रं क्रोशमेकंगयाशिरः ॥ यत्रयत्रस्मरिष्यंति पितृणांदत्तमक्षयं ॥ गयायन० ॥ गदाधराय० ॥ पांडुरंगाय० ॥ उड्डपिकृष्णायनमः गयेयं ॥ ३ ॥ आद्यंस्वयंव्यक्तं विमानं रंगसंज्ञिकं । श्रीमुष्टंवेंकटाद्रिंच शालिग्रामंचनैमिषं ॥ तोताद्रिंपुष्करंचैवनरनारायणाश्रमं ॥ अष्टौमेमुर्तयःसंतुस्वयंव्यक्ताःमहीतले ॥ देवाःतत्समृतंवोस्तु ॥ यथासुखंजुषध्वं ॥ तीर्थंदत्वा ॥ श्रीकृष्णार्पणमस्तु॥ अमृतोपस्तरणमसीस्वाहा ॥ ॐश्रत्धायांप्राणेनमृतंजहोमिस्वाहा ॥ शिवोमाविशाप्रदाहायप्राणयस्वाहा । व्यानेन विष्णोरमृतंजुहोमि ॥ सोमाविशाव्या उदानेनविष्णोरअमृतं जुहोमि । सोमाविशाउदानायस्वाहा ॥ समानेनविष्णोरमृतंजुहोमि सोमाविशा

समानायस्वाहा ॥ ब्रह्मणेस्वाहा ॥ ब्रह्मणिआत्मानंतृप्तायथासुखं ॥ जुषध्वं ॥ तथाहिपूर्वोक्तएवंगुणविशेषणविशिष्टायांपुण्यतिथौ ॥ दशगायत्रींजप्त्वा ॥ श्रात्धसंरक्षणार्थंअभिश्रवणसूक्तमंत्रपठनंकरिष्ये ॥ अपेक्षितंयाचितव्यंत्या-ज्यंचैवानवेक्षितं ॥ उपविश्यसुखेनैवभोक्तव्यंस्वस्थमानसैः ॥ विद्यमानपदार्थेषु शाकपाकेषुयद्रोचतेतद्ग्राह्यं ॥ यन्नरोचतेतत्याज्यं सुखेनैवभोक्तव्यं ॥ गयाकृतश्रा-त्धफलमस्तु ॥ पूर्वोक्तएवंगुणविशेषणविशिष्ठायांपुण्यतिथौ प्रतिसांवत्सरीकश्रा-त्धांगतिलोदकपिंडप्रदानानिकरिष्ये ॥ अपांध्यंयज्ञियंसदेवंशिवयस्तुवमेअछेत्ता-वोमारिषं ॥ जीवामिशरदःशतं ॥ सकृदाछिन्नैर्दर्भैरवस्तीर्य ॥ सिंधुंतां पिता-सिंधुंतां ॥ पितामहःसिंधुंतां ॥ प्रपितामहःसिंधुंतां ॥ एतत्तेअस्मत्पिताअमुक-शर्म ॥ अमुकगोत्र वस्वंतर्गतमुख्यप्राणांतर्गतप्रद्युम्नाय ॥ येचत्वामात्रानो ॥ पित्रेशर्मणेगोत्राय वस्वंतर्गतमुख्यप्राणांतर्गतप्रद्युम्नाययेचतमनुगछंति ॥ तेभ्यश्चायंपिंडःतस्मैतेस्वधांनमः ॥ गयायांविष्णुपादादिसमस्तपादेषुदत्तमस्त्वि

तिभवंतोब्रुवंतु ॥ गयागदाधरप्रीयतामितिभवंतो ब्रु० ॥ गयागदाधरप्रीतोभवतु ॥ पितामह ॥ अमुकशर्म ॥ अमुकगोत्ररुद्रांतर्गतमुख्यप्राणांतर्गतसंकर्षणाय ॥ येचतमनुगछंति तेभ्यश्चायंपिंडःतस्मैतेस्वधांनमः ॥ गयायांविष्णुपादादि० ॥ प्रपितामह अमुकशर्म अमुकगोत्र ॥ आदित्यांगतमुख्यप्राणांतर्गतश्रीवासुदे-वाययेचतमनुगछंतितेभ्यश्चायंपिंडःतस्मैतेस्वधांनमः ॥ गयायांश्रीविष्णुपादा-दिसमस्तपादेषुदत्तमस्त्वितिभवंतोब्रुवंतु ॥ गयागदाधरप्रीयतामितिभवंतो ब्रुवंतु ॥ गयागदाधरःप्रीतोभवतु ॥ यन्मेमातेत्युपस्थानं ॥ यन्मेमानाप्रममदयच्च-चारानुव्रत ॥ तन्मेरेतः पितावक्तामाभुरन्योपपचतं ॥ पितृभ्यःस्व धाविभ्यः स्वधांनमः ॥ पितामहेभ्यःस्वधाविभ्यःस्वधांनमः ॥ प्रपितामहेभ्यः स्वधाविभ्यः स्वधांनमः ॥ अत्रपितृत्युदङमुखः ॥ अमीमदंतपितरःसोम्याः ॥ येसमानाइति सकृज्जप्त्वा ॥ येसमानाः समनसः पितरोयमराज्ये ॥ तेषांलोकःस्वधांनमः ॥ यज्ञोदेवेषुकल्प्यतां ॥ वीरंमेधत्तपितरइत्याघ्राय ॥ वीरंमेधत्तापितरः ॥ मार्जयंता-

poornapathi@gmail.com

मितित्रिरुदकंनिनीय ॥ अंक्षंक्ष्वेत्यंजनं ॥ अंभ्यक्ष्वपितःअमुकशर्मन् ॥ अभ्यं-
क्ष्वपितामहअमुकशर्मन् ॥ अभ्यंक्ष्वप्रपितामहअमुकशर्मन् ॥ एतानिवःपितर
इतिवाससोदशाछित्वानिदधाति ॥ पूर्वेवयस्युत्तरआयुःषिलोमछिंदित ॥ एता-
निवःपितरोवासाऽस्यतोन्योन्यत्पितरोमायोष्ट पितामहायोष्टप्रपितामहायोष्ट ॥
नमोवःपितरइतिनमस्कारंजपति ॥ नमोवःपितरोरसाय ॥ नमोवःपितरःशुष्माय ॥
नमोवःपितरोजीवाय ॥ नमोवःपितरस्वधायैनमोवः पितरोमन्यवे ॥ नमोवः
पितरोघोरायपितरोनमोवोयएतस्मिनलोकेस्छयुष्माऽस्तेनुयेस्मिन् लोकेमातेनु-
यएतस्मिन् लोकेस्थयूयंतेषांवसिष्ठाभूयास्तास्मिनलोकेहं तेषांवसिष्ठोभूयासं ॥
गृहान्नःपितरइत्यूर्ध्वंनिरीक्ष्य ॥ गृहान्नःपितरोदत्त ॥ सदोवःपितरोजेष्मेतिपितृ-
नुपस्थाय ॥ सदोवःपितरोजेष्म ॥ ऊर्जंवहंतिरित्युदकं ॥ अप्रदक्षिणं त्रिर्निनीय ॥
ऊर्जंवहंतिरमृतंपयःकीलालंपरिश्रुतं ॥ मानोन्वाह वामहइतिमनस्वतीभिरुप-
तिष्टते ॥ मानोन्वाहवानहेन्यराशऽशेनस्तोमेनपितृणांचमन्वभिः आनयेतुपुनः

पुनः क्रत्वेदक्षायजीवसे ॥ ज्योक्चद्दशे ॥ उत्तिष्ठंतपितरइतिपितृनुत्थापयति ॥
उत्तिष्ठतपितरःप्रेतशरायमस्यपथामनुवेतापुराणं ॥ धत्तादस्मासुद्राविणंयच्चभद्रं ॥
प्रणोभूताद्भागदादैवतासु ॥ परेतपितरइतिपितृन् प्रवाहण्यान्प्रवाहयति ॥ परेत-
पितरःसोम्यागंभीरोपथिभिःपूर्वैः ॥ अथापितृत्सगिदत्राऽअपियमेनयेराधमा-
दंमदंति ॥ प्रजापतेनत्वदेतानितियज्ञोपवीत्यौपानदेशंगत्वा ॥ प्रजापतेनत्वदे-
तान्यन्योविश्वाजातानिपरितावभूवयत्कामास्तेजुहुमस्तन्नोअस्तुवयऽस्यामपतयो
रयीणां ॥ यदंतरिक्षमित्युपतिष्ठते ॥ यदंतरिक्षंपृथिवीमुतद्यांयन्मातरंपितरवा-
जहिऽसिम ॥ अग्निर्मातरस्मादेनसःप्रमुंचतु ॥ दुरितानियानिचक्रमकरोतुमात्र-
वेहसंवरिंधत्तपितरः ॥ कुलाभिवृध्यर्थंसव्येनपार्वणपूजांकरिष्ये ॥ पिंडस्थपितरः
गंधंस्वधा ॥ तिलाक्षतान्यवाक्षतान्स्वधा ॥ विष्णोर्निर्माल्यतुलसीपत्रंस्वधा ॥
भृंगराजपत्रंस्वधा ॥ धू०स्व० ॥ अपूपहारनैवेद्यंस्व० पूगीफलतांबूलंस्व० ॥
सुवर्णपुष्पदक्षिणांस्व० ॥ मंत्रपु०स्व० ॥ इत्यथेनानुपतिष्ठेतां ॥ गयायांधर्मे

पिंडेषुसदासिब्रह्मणस्पते ॥ गयाशीर्षेवटेचैवस्वयमेवजनार्दन ॥ त्वंदृष्ट्यापुंडरी-
काक्षमुच्यतेचरणत्रयं ॥ शमीपत्रप्रमाणेनपिंडंदद्याद्गयाशिरे ॥ उत्धरत्सप्तगोत्राणि
कुलमेकोत्तरंशतं ॥ देशकालपात्रमंत्रतंत्रकर्तृभोक्तृद्रव्यैः न्यूनातिरिक्तान्निच्छिद्रम-
स्त्वितिभवंतोब्रुवंतु ॥ न्युनातिरिक्ताभ्यांनिच्छिद्रमस्तु ॥ एवंगुणविशेषणविशि-
ष्ठायां पुण्यतिथौस्वगृहेशालिग्रामचक्रांकितविष्णुवैष्णवसंनिधौगोब्राह्मणसंनिधौ
अनेनक्रियमाणेनपितुःप्रतिसांवत्सरीकश्रात्धीयतीलोदकपिंडप्रदानेन पितृपिता
महप्रपितामहानांशर्मणांगोत्राणां एतेषांसगणोभूत्वागयायांप्रतिसांवत्सरीकश्रा
द्धीयतदंगतिलोदकपिंडप्रदानेनैवअक्षय्यातृप्तिरस्त्वितिभवंतोब्रुवंतु ॥ तिलो-
दकपिंडप्रदानेनैवअक्षय्यातृप्तिरस्तु ॥ एकोविष्णुर्म० ॥ अनेनपितृयज्ञेन
भगवान् पित्रंतर्यामि विश्वेदेवांतर्यामि अनिरुत्धप्रद्युम्नसंकर्षणवासुदेवात्माच-
तुर्मूर्तिश्रात्धस्वामी श्रीमध्ववल्लभजनार्दनवासुदेवःप्रीयतांप्रीतोभवतु ॥ मधुवा
ताऋतायते० ॥ विश्वेदेवाःतृप्तास्थःतृप्तास्मः अपसव्य० ॥ अक्षन्नमीमदंत

ह्यवःप्रियाअधूषता अस्त्वौषधः स्वधानवोविप्रानविष्टयावतीयोजान्विंदतेहरी ॥
मधुमधुसंपन्नंसुसंपन्नं ॥ श्रात्धीयपदार्थेषुयादिष्टंतद्याचतां ॥ सर्वंसंपूर्णतास्तु ॥
पितृपितामहप्रपितामहाः तृप्तास्तःतृप्तास्मः ॥ सव्य ॥ असोमपाश्चयेदेवाः यज्ञ
भागविवर्जिताः ॥ तेषामन्नंप्रदास्यामिविकिरंवैश्वदैविकं ॥ अपसव्य ॥ असंस्कृत
प्रमेतायैत्यागिन्योयाकुलस्त्रियः ॥ दास्या मितेभ्योविकीरमन्नंताभ्यश्चपैतृकं ॥
येअग्निदग्धायेअनग्निदग्धायेवाजाताकुलेमम॥तेभिस्वरान्नसूनीतिमेतांस्वधाभिर्य
ज्ञंसुकृतंजुषस्व । अग्निदग्धेभ्यःअनग्निदग्धेभ्यःअस्मत्कुलप्रसूतेभ्यःउच्छिष्टभाग्भ्यः
अयंपिंडंस्वधांनमः ॥ अग्निदग्धाश्चअनग्निदग्धाश्चमार्जयंतां ॥ एतद्वःतिलोदकं
॥ उच्छिष्टभाग्भ्योअन्नंदीयतां ॥ यजमानकुलेजातादासादास्यनकांक्षिणः ॥
तेसर्वेतृप्तिमायांतु मयादत्तेनभूतले ॥ अमृतापिधानमसि ॥ स्वस्तिशोभनंशां-
तिरस्तु ॥ पुष्टिरस्तु ॥ स्वस्थानेवासः ॥ शिवापःसंतुसंतुशिवापः दर्भाःपांतु पांतु-
दर्भाः ॥ यवाःपांतु ॥ पांतुयवाः ॥ तिलाःपांतु ॥ पांतुतिलाः ॥ दर्भाःपांतु-

poornapathi@gmail.com

पांतुदर्भाः ॥ अक्षतंचारिष्ठंचास्तु ॥ अपसव्य ॥ शिवापःसंतु ॥ गोत्रोद्भवोहंअभिवादये ॥ युष्मत्प्रसादेन अस्मद्गोत्रंवर्धतां ॥ स्वस्तिवर्धतां ॥ पुरूरवार्द्रसंज्ञिकाः विश्वेदेवा भोजनपात्रमुच्चालयिष्ये ॥ उच्चालय ॥ स्वस्तीतिब्रूतास्वस्ति ॥ मयादत्तंश्रात्धमन्नं अक्षय्योदत्तमस्त्वितिब्रूत । अस्त्वक्षय्योदकं । पितृपितामहप्रपितामहाः भोजनपात्रमुच्चालयिष्ये ॥ उच्चालय ॥ स्वस्तीतिब्रूत ॥ स्वस्ति ॥ मयादत्तश्रात्धमन्नंअक्षय्योदकमस्त्वीतिब्रूत ॥ अस्त्वक्षय्योदकं ॥ उपविष्टेभ्यःब्राह्मणेभ्यःश्रात्धभोजनसाद्गुण्यार्थंयावच्छक्तिदक्षिणाःपांतु ॥ पांतुदक्षिणाः ॥ स्वधांवाचयिष्ये ॥ पिंडान्नमस्कृत्य ॥ युष्मदनुज्ञयामहापिंडानुद्वासयिष्ये ॥ उद्वासय ॥ तद्विष्णोःपरमंपदं ॥ अयोध्यामथुरामाया काशीकांचीअवंतिका ॥ पुरीद्वारावतीचैवसप्तैताःमोक्षदायकाः ॥ वाच्यतां ॥ व्याहृतिः ॥ ऋचैत्व ॥ ऋचेत्व ॥ समित्स्रवंतिसरितोनधेनाः ॥ अंतर्हृदामनसापूयमानाः ॥ घृतस्यधाराअभिचाकशीमि ॥ हिरण्ययोवेतसोमध्यआसां ॥ तस्मिन्सुपर्णोमधुकृत्कुलायैभ-

जन्नास्ते मधुदेवताभ्यः ॥ तस्यासते हरयः सप्ततीरे स्वधांदुहानाम मृतस्यधारां ॥ ततोविश्वेदेवाःप्रीयंतामितिविश्वेदेवपात्रोदकंविप्रहस्तेननिनीय । प्रीयंतांविश्वेदेवाः । वसुपुरोगाःपितरःप्रीयंतामितिभवंतोब्रुवंतु । प्रीयंतांपितरः । स्वधोच्यतामितिभवंतोब्रुवंतु । श्रात्धविसर्जनेविनियोगः । वाजेवाजेवतुवाजिनोधनेषुविप्राअमृताऋतज्ञाः । अस्यध्वपिवतमादयध्वंतृप्तायांतुपथिभिर्देवयानैः । उत्तिष्ठतुपितरः । अनुगच्छंतिसव्येनविश्वेदेवैःसह । आमावाजस्येतिप्रदक्षिणकृत्वा ॥ आमावाजस्यप्रसवोजगस्यद्यावापृथ्वीविश्वशंभुः । आमागंतांपितरोमातरोचामासोमोअमृतत्वायगम्यात् ॥ दातारोनोभिवर्धतां ॥ वेदाःसंततिरेमनः ॥ श्रत्धाचमेमाव्यगमद्बहुधेयंचास्तु ॥ अन्नंचनोबहुभवेदातिथींश्चलभेमहि ॥ याचतारश्चेमाःसंतुमाचयाचिष्मकंचन ॥ दातारोवोभिवर्धतां ॥ वेदाःसंततिरेमनः ॥ श्रत्धाचनोमाव्यगमद्बहुधेयंचवोस्तु ॥ अन्नंचवोबहुभवेदतिथींश्चलभध्वं ॥ याचतारश्चवःसंतुमाचयाचिष्मकंचन ॥ अन्नशेषैःकिंक्रियतां ॥ इष्टैःसहभोज्यतां ॥

स्वादुषंसदः पितरोवयूधा० ॥ एताःआशिःषःसंतु ॥ वंशाभिवृद्धिरस्तु ॥ गोत्रं गोत्रस्याभिवृत्धिरस्तु ॥ पितृंतर्यामिश्रीमज्जनार्दनवासुदेवप्रसादोस्तु ॥ वसिष्ठासःपि० ॥ अद्यमेसफलंजन्मभवत्पादाब्जवंदनात् ॥ अद्यमेवंशजाःसर्वेजातावोनुग्रहादिमं ॥ पत्रशाकादिदानेनक्लेशितायूयमीदृशाः ॥ तक्लेशजातंचित्तेवविस्मृत्यक्षंतुमर्हथ ॥ वसिष्ठवामदेवसदृशाःब्राह्मणाःसूर्योपरागचंद्रोपरागसदृशाः अतिथयरागताःआरान्नभोजनद्रव्यदक्षिणाःसर्वंन्यूनंसर्वंसंपूर्णतास्तु ॥ अष्टावष्टवन्हेषुधिष्ण्येषु ॥ त्वष्टारापःपशवःपशूनेवावरुंधे ॥ षण्मांजालीयेषड्वाऋतवः खलुवैदेवान्पितृन्प्रीणाति ॥ वामदेवायनमोज्येष्ठायनमश्रेष्ठायनमःकालायनमः कलविकरणायनमोबलविकरणायनमो बलायनमोबलप्रमथनायसर्वभूतदमनाय नमोनमः ॥ भागधेयेनैवेनंप्रणयति ॥ ब्राह्मणआर्षेयमुत्धरेत् ॥ ब्राह्मणोवैसर्वादेवताःसर्वाभिरेवैनंदेवताभिरुत्धरति ॥ अनादरमतिक्रम्यनमस्कारंतुपूर्वकं ॥ उभयोःकर्मबत्धोहमासीमांतमनुव्रजे ॥ नानुव्रजामि ॥ यन्मयाविहितंश्रात्धंपरिपूर्णंतदस्तुमे ॥ यस्यस्मृत्या० ॥ बृहत्सामक्षत्रद्वद्वृंत्धवृाष्णितृाष्णिभोज क्षुभितमुग्रवीरं इंद्रस्तोमेन पंचदशेन मध्यामिदंवातेन सगरेणरक्ष ॥ इतिमंत्रेणहस्तंप्रताप्य ॥ कष्टिबंधं मुच्य ॥ अनेनपितृयज्ञेनभगवान्श्रीमज्जनार्दनवासुदेवः प्रीयतांप्रीतोभवतु ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

इदं पुस्तकं (वेणुपुरस्थ) बेळगांवनगरस्थ सांवंतोपाव्हय रामचंद्रात्मज आबाजीना विद्वद्भिः परिसंशोध्य स्वकीय (रामतत्व-प्रकाशाभिध) मुद्रायंत्रे अंकइत्वा प्रकट मकारिः शकाब्दाः—१८२६.

poornapathi@gmail.com